# संस्कृतवार्ता:

**दिनाङ्क :-21.09.2025** **प्रात: - 06:55**

**पीएम-गुजरात:**

प्रधानमन्त्री नरेन्द्रमोदी प्रत्येकस्मिन् क्षेत्रे आत्मनिर्भरतायाः आह्वानम् अकरोत्, विदेशेषु भारतस्य अवलंबनम् तस्य बृहत्तमेषु शत्रुषु अन्यतमम् अस्ति इति दृढीकृतवान्। सः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं विकसितभारतस्य सङ्कल्पं साधयितुं भारतं स्वावलंबी-राष्ट्ररूपेण विश्वस्य समक्षं स्थातुं समयः इदमेव अस्ति। प्रधानमन्त्री ह्य: भावनगरे 'समुद्र से समृद्धि' इति कार्यक्रमे सम्बोधयन् आसीत्। भारतं समुद्रीय-महाशक्तिः निर्मातुं स्वस्य सर्वकारस्य दूरदृष्टिं प्रकटयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् सप्तचत्वारिंशदधिक द्विसहस्रतम-वर्षपर्यन्तं वैश्विक-समुद्रीय-व्यापारे देशस्य भागं त्रिगुणितं कर्तुं लक्ष्यम् अस्ति। कार्यक्रमावधौ प्रधानमन्त्रिणा द्वात्रिंशत्सहस्रकोटिरूप्यकाणां बहुविध-परियोजनानां उद्घाटनम्, शिलान्यासं च विहितम्। श्रीमोदी मुम्बई-अन्ताराष्ट्रिय-क्रूज्-टर्मिनल् इत्यस्य अपि उद्घाटनं विहितवान्, अपि च अष्टशताधिक सप्तसहस्र कोटिरूप्यकाणां अनेकासां प्रमुख-सागरीय-परियोजनानां उद्घाटनं कृतवान्। भारतस्य ऐतिहासिकस्य सागरीयशक्ति-विषये प्रवदन्, प्रधानमन्त्री अवदत् यत् एकः समयः आसीत् यदा विश्वस्य चत्वारिंशत् तः पञ्चाशत् प्रतिशतं यावत् सागरीय-व्यापारा: भारते निर्मितानां नौकायानेन क्रियते स्म। सः अघोषयत् यत् इदं क्षेत्रं शीघ्रमेव "एकराष्ट्रं, एकपत्तन प्रक्रियां" अङ्गीकरिष्यतीति, यस्य उद्देश्यं सम्पूर्णे देशे पत्तन-प्रक्रियां सरलीकरणम् अस्ति।

**एच. एम.-साक्षात्कारः**

केन्द्रीयगृहमन्त्री अमितशाहः अवदत् यत् आगामिवर्षस्य मार्चमासपर्यन्तं वामपक्षस्य उग्रवादः देशात् पूर्णतया उन्मूलितः भविष्यति। एकेन निजी-वाहिन्या सह वार्तालापं कुर्वन्, श्रीशाहः अवदत् यत्, सर्वकारस्य प्रयत्नेन पूर्वदशके पूर्वोत्तर-वामपक्ष-उग्रवादप्रभावित-क्षेत्रैः सह त्रिषु प्रमुखेषु क्षेत्रेषु हिंसायाः घटनायां पञ्चसप्तति प्रतिशतं यावत् न्यूनतागता।

**एच-1बी-वीसा**

विदेशमन्त्रालयः अवदत् यत् अमेरिकादेशस्य एच-1बी-वीसा-कार्यक्रमे प्रस्तावित-प्रतिबन्धनेन सम्बद्धोपायानां पूर्णप्रभावानां च भारतीय-उद्योगं समेत्य सम्बद्ध पक्षैः अध्ययनं प्रचलति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जायसवालः एकस्मिन् वक्तव्ये अवदत् यत् भारत-अमेरिका-देशयोः उद्योगजगतः नवाचारेषु रचनात्मकतायां च रुचिः अस्ति तथा च अग्रे सर्वोत्तममार्गेषु परीचर्चायाः अपेक्षास्ति।

**गोयल्-अमरिक्रा:-**

केन्द्रीयवाणिज्य-उद्योग-मन्त्री पियूष गोयलः श्वः प्रतिनिधिमण्डलेन सह अमेरिकादेशस्य यात्रायां भविष्यति। मन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् प्रतिनिधिमण्डलस्य परस्पर-लाभप्रद-व्यापार-सन्धेः शीघ्रनिष्कर्षः प्राप्तुं चर्चां अग्रे नेतुं योजना अस्ति इति।

**मोहनलाल दादासाहब**

सुप्रसिद्धः अभिनेता, निर्देशकः, चलचित्र-निर्माता च मोहनलालः त्रयोविंशत्यधिक द्विसहस्रतम वर्षस्य प्रतिष्ठितेन दादासाहेब-फाल्के-पुरस्कारेण सम्मानितः भविष्यति। सामाजिकान्तर्जालीये सन्देशे, सूचना-प्रसारण-मन्त्रालयः अवदत् यत् दादासाहेब्-फाल्के-पुरस्कार-चयनसमितेः अनुशंसया, भारतीयचलच्चित्रे विशिष्ट-योगदानाय मलयाळम्- अभिनेतुं पुरस्कारं दातुं सर्वकारः निर्णयम् अकरोत् इति। प्रधानमंत्री नरेन्द्रमोदी, गृहमंत्री अमित शाह: च पुरस्कारार्थं चयनाय श्री-मोहनलालं अभिनन्दितवन्तौ।

**मुरुगन्-बुक्-लाञ्च्**

सूचना-प्रसारण-राज्यमन्त्री एल्. मुरुगनः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे पञ्चविंशति कोटिजनाः दारिद्र्यात् बहिः ,समागताः सन्ति। ह्य: नवदिल्ल्यां मोदीनोमिक्स्-ए जर्नी आफ् इन्क्लूसिव् ग्रोथ् इति पुस्तकस्य विमोचनानन्तरं मन्त्री अवदत् यत् अस्मिन् पुस्तके प्रधानमन्त्रिणः नरेन्द्रमोदिनः पञ्चविंशति वर्षाणि यावत् सार्वजनिकसेवाः, गुजरातस्य मुख्यमन्त्रीतः भारतस्य प्रधानमन्त्रीपर्यन्तं, तस्य परिवर्तनशीलयात्रा च चित्रितम् अस्ति। प्रधानमन्त्री-जन-धन-योजना, प्रधानमन्त्री-सुरक्षा-बीमा-योजना इत्यादीनां योजनानां उल्लेखं कुर्वन् श्रीमुरुगनः अवदत् यत् एताः योजनाः जनानां कल्याणाय कार्यान्विताः सन्ति।

**एशिया कप-**

विंशति प्रति विंशति एशियाकप-क्रिकेट- प्रतिस्पर्धायां अद् दुबईनगरे भारत- पाकिस्तानयो: मध्ये सूपर-फोर इत्यस्य द्वितीया स्पर्धा भविष्यति। भारतीय-मानक-समयानुसारं क्रीडाया: आरम्भ: रात्रौ अष्ट-वादने भविष्यति।

**।।इति वार्ता:।।**